**Kalika Prabha : Journal of Multidisciplinary Studies**
[ISSN:- 3021-9388 (Print)]
Published by Kalika Sanskrit Vidyapeeth (RMC) Nawalpur, Nepal
https//www.ksv.edu.np

# वैयाकरणसिद्धान्तकौमुद्या आदिमङ्गलकारिकाविमर्शः

**रामचन्द्रकण्डेलः (विद्यावारिधिः)**

*सहप्राध्यापकः, ने.सं.वि., कालिकाविद्यापीठम्*

***Article History :*** *Received : 27th, Jan. 2026; Reviewed: 23rd, March 2026; Accepted: 29th June, 2026*
***Corresponding Author*** *: Ramchandra Kandel, PhD* ***E-mail :*** *ramchandrakandl@gmail.com*
***DOI :*** *https://doi.org/10.3126/kp.v4i1.97096*

## शोधसारः

*शब्दब्रह्म वेदः। तस्याङ्गानि षट्। षट्स्वङ्गेषु व्याकरणं प्रधानम्। नैकेषु व्याकरणेषु पाणिनीयव्याकरणं प्रसिद्धम्। व्याकरणाध्यायनपरम्परायां पूर्वमष्टाध्यायिपाठोऽथवा सूत्रानुसारी पाठ आसीत्। पश्चात् प्रक्रियाग्रन्थाः रचिताः। यद्यपि रामचन्द्रशेषकृष्णाभ्यां प्रयासो जातस्तथापि भट्टोजिदीक्षितरचिता वैयाकरणसिद्धान्तकौमुदी प्रसिद्धा। सिद्धान्तकौमुद्यां कारिका बह्व्यः सन्ति। तासु कारिकासु प्रथमा मङ्लामङ्गलाचरणकारिका विमर्शनीया। अत्र आचार्येण छात्रान् सम्यक् बोधयितुं व्याख्या क्रियते। तस्मादत्र पाठनाय पठनाय च विमर्शः क्रियते। अत्र प्रथममङ्गलाचरणकारिकाव्याख्यानप्रसाङ्गे कारिकायाः दण्डान्वयः खण्डान्वयश्च कृतः। कारिकास्थपदानां व्युत्पत्तिप्रदर्शनपूर्वकं पारिभाषिकोर्थ शाब्दबोधश्च दर्शितः। कारिकाया व्याख्यापूर्णतायै टिप्प्यश्च सन्ति। व्युत्पत्तिबोधाय पाणिनिसूत्राण्यपि स्थापितानि। बह्वभ्यष्टीकाग्रन्थेभ्यः विदुषां मतान्यपि संगृहीतानि। विमर्शेनानेन वैयाकरणपाठकानां लाभः स्यादिति।*

**शब्दकुञ्जी** : अनुबन्धः, अन्वयः, बौद्धपदार्थः , मङ्गलं , मुनिः ,

## विषयप्रवेशः

ग्रन्थरचनायादौ मङ्गलाचरणमस्माकं शिष्टाचारः। तस्माद् वैयाकरणसिद्धान्तकौमुद्यामादौ भट्टोजिदीक्षित इष्टदेवरूपं मुनित्रयं नमस्करोति। मङ्गलाचरणरूपकारिकार्थपूर्णास्ति। तदर्थं स्पष्टयितुं विमर्शस्यावश्यकतास्ति। तस्मादत्र दण्डन्वय-खण्डान्वयबोधोत्तरमनेका शङ्का च जायन्ते। ताः शङ्काः समाधानार्थमत्र पाणिनीयशास्त्रानुसारेण व्युत्पत्तिः प्रदर्शिता। शब्दानामनेकार्थत्वादत्रानेकार्था दत्ताः। गूढार्थं प्रकटयितुं परिष्कारवाक्यानि च दत्तानि। पाठकानां जिज्ञासासमाधानार्थ व्याकरणशास्त्रस्य परिभाषा अन्यशास्त्राणां टिप्प्यश्च प्रस्तुताः सन्ति। मङ्गलाचरणस्याशयं प्रकटयितुमनेका उक्तयश्च लिखिता सन्ति। यद्यपीदं मङ्गलाचरणं नमस्कारात्मकमस्ति। तथापि मङ्लव्याख्यानक्रमे

व्याकरणशास्त्रस्य नैकेविचाराः प्रसङ्गानुसारेण स्थापिताः। यद्यपि पाठकानां काठिन्यं तु भवत्येव तथापि अनेन विमर्शपठनेन शङ्कासमाधानपूर्वकं तेषां ज्ञानं वर्धत एव। तस्माद् अत्र व्याकरणशास्त्रस्य सर्वेषां ग्रन्थानां सारविषय: स्थापितः।

## शोधकार्यस्य समस्योद्देश्यञ्च

लेखरचनाप्रसङ्गे समस्यास्तु कारणानि एव। तस्मादत्र समस्या सन्ति। मुनित्रयमिति मङ्गलकारिकाया अन्वयं व्युत्पत्तिश्च कीदृशी ? कारिकाव्याख्यानक्रमे कानि उद्धरणानि स्थापनियानि ? अस्य मङ्गलकारिकायाः व्याख्यानक्रम कीदृशः? शङ्कानामेतासां निराकरणार्थ कृतस्यानुसन्धानस्यैते विषयाः समस्यारूपेणोपास्थापिता सन्ति।

विमर्शेऽस्मिन्नुक्तसमस्यायाः समाधानार्थमुद्देश्यानि स्थापितानि सन्ति। मुनित्रयमिति मङ्गलकारिकायाः सान्वयं व्युत्पत्तिपूर्वकं विमर्शः। कारिकाव्याख्यानक्रमे व्याकरणशास्त्राणा तेषां टीकानामुद्धरणसंस्थापनम्। अस्य मङ्गलकारिकायाः व्याख्यानक्रमः अन्वयप्रदर्शनं टिप्पणीप्रदानं तात्पर्यप्रदानं च भवति।

## शोधविधिः

प्रस्तुतस्याध्ययनस्य कृते सामग्रीसङ्कलनार्थं पुस्तकालयस्योपयोगो विहितः। विषयस्रोतस्तु संस्कृतव्याकरणस्य पाणिनीयव्याकरणव्याख्यानसम्बद्धाः वैयाकरणसिद्धान्तकौमुदी-पातञ्जलमहाभाष्य-परमलघुमञ्जूषा - प्रौढमनोरमा - बालमनोरमा-तत्त्वबोधिनी-वैयाकरणभूषणसारादिग्रन्थाः सन्ति। विषयप्रस्तुतिकरणे शास्त्रीयप्रसङ्गे निगमनात्मको विधिरवलम्बित:। व्याख्याविश्लेषणे चागमनात्मकविधिना विषयोपस्थानं विहितमस्ति। पादटिप्पणीसन्निवेशे परम्परागतो विधिरनुसृतः। सन्दर्भसूचीनिर्माणे लेखकपृष्ठपद्धतिरनुसृता विद्यते।

## विश्लेषणस्य सैद्धान्तिकाधार:

संस्कृतव्याकरणशास्त्रस्य मूलग्रन्थाः मुख्यतया सैद्धान्तिकाधारा: सन्ति। मूलग्रन्थरूपेण सूत्रग्रन्थाः, वार्तिकग्रन्थाः, भाष्यग्रन्था:, व्याख्याग्रन्था:, टीकाग्रन्था इत्यादयो ग्रन्थाः प्राधान्येन गृह्यन्ते। वैयाकरणसिद्धान्तकौमुद्या आदिमङ्गलकारिकाविमर्शेनुसन्धाने विषयविश्लेषणस्य सैद्धान्तिकाधाररूपेण " मुनित्रयं नमस्कृत्य ... कौमुदीयं विरच्यते" इति पद्यं गृहीतमस्ति। अस्याः कारिकायाः व्याख्याविश्लेषणक्रमेऽत्रदण्डन्वय-खण्डान्वयप्रदर्श्य कारिकास्थपदानां व्युत्पत्तिप्रदर्शनादीनां सम्यग् विवेचनं विहितमस्ति। सन्दर्भेऽस्मिन्वैयाकरणसिद्धान्तादयो ग्रन्थाः सैद्धान्तिकाधारेणाङ्गीकृताः सन्ति।

## शोधसीमाङ्कनम्

भट्टोजिदीक्षितविरचितवैयाकरणसिद्धान्तकौमुद्या आदिमङ्गलकारिकाविमर्शमस्यानुसन्धानस्य क्षेत्रं “मुनित्रयमि”ति पद्यमस्ति। अस्याः कारिकायाः विमर्शे बालमनोरमा-तत्त्वबोधिन्यौ टीके, प्रौढमनोरमा-लघुशब्देन्दुशेखरव्याख्याग्रन्थौ व्याकरणमहाभाष्यञ्चावलोक्य तेषां मतानां प्रकाशनमनुसन्धानकार्यस्य सीमा वर्तते।

# वैयाकरणसिद्धान्तकौमुद्या आदिमङ्गलकारिकाविमर्शः

मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च।

वैयाकरणसिद्धान्तकौमुदीयं विरच्यते॥

'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते, वीरपुरुषाणि भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च वृद्धियुक्ताः यथा स्युः'- महाभाष्ये (पतञ्जलिः, सन् १९८८, पृ, ५१)। समाप्तिकामो मङ्गलमाचरेत् विघ्नध्वंसकामो मङ्गलमाचरेत्। - शिष्टाचारानुमितश्रुतिः वेदप्रामाण्याभ्युपगन्तृत्वम् शिष्टत्वम्। फलसाधनतांशे भ्रान्तिरहितत्वं शिष्टत्वम्। मङ्गम् = पापम्, लुनाति = छिनत्ति। मम् = अशुभम्, गलयति = विनाशयति। मङ्गति = गच्छति दुरदृष्टमनेन मङ्गति = सर्पति हितार्थम्। मगम् = शुभम्, लाति = आददाति। समाप्तिप्रतिबन्धकीभूतविघ्नध्वंसासाधारणकारणत्वं मङ्गलत्वम्। विघ्नभिन्नत्वे सति विघ्नध्वंसप्रतिबन्धकाभावभिन्नत्वे सति प्रारिप्सितविघ्नध्वंसासाधारणकारणत्वम् मङ्गलत्वम्। प्रारिप्सितग्रन्थसम्बद्ध-सकलदुरितोपशामकत्वे सति ग्रन्थविशिष्टत्वम् मङ्गलत्वम्। वैशिष्ट्यञ्च - स्वाव्यवहितपूर्वत्व - स्वाव्यवहितोत्तरत्व-स्वघटकत्वैतदन्यतमसम्बन्धेन। मङ्गलं त्रिविधम्। नमस्कारात्मकम् = स्वावधिकोत्कृष्टत्वप्रकारकबोधानुकूलः करशिरःसंयोगादिरूपो व्यापारः नमस्कारस्तदात्मकम्। 'भवान् मत् उत्कृष्टः' इत्यत्र उत्कृष्टत्वम् प्रकारस्तन्निष्ठा प्रकारता, तन्निरूपको यो व्यापारः = नमस्कर्तृनिष्ठः करशिरःसंयोगपाद-वन्दनादिरूपो नमश्शब्दप्रयोगरूपो स एव नमस्कार इत्यर्थः। अथवा, स्वनिष्ठापकृष्टत्वप्रकारकबोधप्रकारकबोधानुकूलो व्यापारो नमस्कारस्तदात्मकम्। 'देवान्नमस्करोति देवदत्त' इत्यादौ स्वशब्दवाच्यदेवदत्तवृत्त्यपकृष्टत्वप्रकारको बोधः = 'अहं त्वत्तोऽपकृष्टः' इत्याकारको देवदत्तवृत्तिस्तत्प्रकारको बोधः = 'अयञ्जनो मत्त आत्मानमपकृष्टं जानाति' इत्याकारको देववृत्तिस्तदनुकूलो व्यापारः देवदत्तवृत्तिरिति लक्षणसमन्वयः। - तत्त्वप्रकाशिका नमस्कारश्च त्रिविधः।

कायिकः वाचिकः मानसिकः कायिकश्च द्विविधः यत्किञ्चिदङ्गकृतः अष्टाङ्गकृतश्च।

जानुभ्याञ्च तथा पद्भ्यां पाणिभ्यामुरसा धिया।

शिरसा वचसा दृष्ट्या प्रणामोऽष्टाङ्ग ईरितः॥(एकादशीमहात्म्यः, वि.सं.२०२५,पृ.१३२)

आशीर्वादात्मकम् = आशिषः = अभीष्टार्थप्रार्थनस्य, वादः = वाक्यम्।

वस्तुनिर्देशात्मकम् = नमस्कार्यदेवतादिगुणगणवर्णनात्मकम्

ग्रन्थसमाप्तिग्रन्थप्रचारादिप्रतिबन्धकदुरितप्रशमाय समुचितऋषित्रयनमस्काररूपं मङ्गलमाचरन् शिष्यशिक्षायै व्याख्यातृश्रोतॄणामनुषङ्गतो मङ्गलाय च निबध्नाति लघुशब्देन्दुशेखरः-

(फलान्तरेच्छया प्रवृत्तस्य अनायासेन फलान्तरसम्बन्धोऽनुषङ्गः)

शब्दानां परस्परमर्थानुगमनमन्वयः। तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने। - अभिहितान्वयवादः, भाट्टमीमांसकः।

अर्थानुरूपं पदानां क्रमिकव्यवस्थापनमन्वयः। मुख्यार्थस्येतराक्षेपो वाक्यार्थान्वयसिद्धये।

अन्वयो द्विविधः - दण्डान्वयः, खण्डान्वयश्च।

दण्डवत् कर्तृकर्मक्रियादिक्रमेणान्वयः दण्डान्वयः।

प्रतिज्ञावचनपुरःसरं पदानां प्रश्नोत्तरभावेनान्वयः खण्डान्वयः। कर्तव्यत्वप्रकारकज्ञानानुकूलो व्यापारः प्रतिज्ञा।

**दण्डान्वयः**

(मया = भट्टोजिदीक्षितेन) मुनित्रयं नमस्कृत्य, तदुक्तीः परिभाव्य च इयं वैयाकरणसिद्धान्तकौमुदी विरच्यते।

मुनित्रयम् मुनि: मन ज्ञाने (दिवादि:, आत्मने०) मनु अवबोधने (तनादि:, आ०) मन्यते, मनुते = जानाति वेदशास्त्रस्य वास्तवं तत्त्वमिति मुनिः। (मनेरुच्चोपधायाः, उणा०) इति इन्, अत उच्च। (किदित्यनुवृत्या न गुणः) मन्तारो वेदशास्त्रार्थतत्त्वावगन्तारो मुनयः ( तत्त्वबोधिनी , पृ.१)। मन्यन्ते = वेदादिशास्त्रतत्त्वमवगच्छन्ति ये ते मुनयः = साधकबाधकप्रमाणोपन्यासरूपयुक्तिभिः श्रुत्यर्थावधारणरूपमननशीलाः- लक्ष्मीः।

तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति, यज्ञेन दानेन तपसाऽ नाशकेनैतमेव विदित्वा मुनिर्भवति। ( बृहदारण्यक ४-४-२२ )

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।

वीतरागभयक्रोधो स्थितधीर्मुनिरुच्यते॥(श्रीमद्भगवद्गीता, २- ५६,पृ.२४)।

त्रयम्, त्रि = त्रित्वसङ्ख्याविशिष्टावयवः, तयप् = समुदायः, त्रयम् = त्रित्वसङ्ख्याविशिष्टावयवघटितसमुदायः, (आदशतः सङ्ख्याः सङ्ख्येये) (प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थस्यैव प्राधान्यम् ) विंशत्याद्याः सदैकत्वे सर्वाः सङ्ख्येयसङ्ख्ययोः (अमरकोषः , पंक्ति १८७ ३ , पृ. १९७) त्रि+तयप् = त्रयोऽवयवाः यस्य इति विग्रहे - "सङ्ख्याया अवयवे तयप्"(५/२/४२) इति सूत्रेण तयप्। "द्वित्रिभ्यां तयस्यायज्वा" (५/२/४३/) इति सूत्रेण अयजादेशः, भत्वादिकारलोपः, स्वादिकार्यम्। सङ्ख्यायाः० इत्यत्र "समर्थानां प्रथमाद्वा"(४/१/८२), "तदस्य", "ङ्याप्प्रातिपदिकात्"(४/१/१)

इत्यादयोऽनुवर्तन्ते, तथा चार्थः - प्रथमात् = प्रथमान्तात् = प्रथमान्तोच्चारितपदबोध्यात्, अवयवार्थवृत्तिर्या सङ्ख्या तादृशसङ्ख्यावाचकं यत् प्रातिपदिकम्, तादृशप्रातिपदिकप्रकृतिका या प्रथमा, तदन्तात् समर्थात् = परिनिष्ठितात्, सुबन्तात् "अस्य" इति षष्ठ्यर्थे = अवयविनि अर्थे तयप् प्रत्ययो भवतु।

(अवयवार्थे वर्तमानात् सङ्ख्यावाचकात् परिनिष्ठितात् प्रातिपदिकात् अवयविन्यर्थे तयप् भवतु) अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकाऽनाक्रान्तत्वं परिनिष्ठितत्वम् = कृतसन्धिकार्यत्वमिति यावत्। अप्रवृत्ताः ये नित्यविधयस्तेषां यदुद्देश्यतावच्छेदकं, तेनानाक्रान्तत्वम्। त्रि = त्रित्वविशिष्टावयवः, तयप् = समुदायः/अवयवी,।

"प्रकृतिप्रत्ययौ सहार्थं ब्रूतः, तयोः प्रत्ययार्थस्यैव प्राधान्यम्" इति

न्यायेन प्रकृत्यर्थस्य स्वघटितत्वसम्बन्धेन (अनुयोगिवृत्तिधर्म एव सम्बन्धो भवतीति नव्यनैयायिकाः, तद्रीत्याऽयं प्रकल्पः) प्रत्ययार्थे समुदायेऽन्वयः।

मुनीनां त्रयम् = मुनित्रयम्। "षष्ठी" (२/२/८)इति समासः। (षष्ठ्यन्तं समर्थं सुबन्तं समर्थेन सुबन्तेन सह विभाषा समस्यते, स तत्पुरुष:) मुनिपदार्थस्य क्वान्वयः ? कश्च सम्बन्धः ? षष्ठ्यर्थः कः ? त्रित्वसङ्ख्यायाम् ? त्रित्वसङ्ख्याविशिष्टेऽवयवे ?

समुदाये ? न तावत् त्रित्वसङ्ख्यायां, न वा त्रित्वसङ्ख्याविशिष्टेऽवयवेऽन्वयः संभवति,

"पदार्थः पदार्थेनान्वेति, न तु पदार्थैकदेशेन" (व्युत्पत्तिवादः,पृ.७)

"सविशेषणानां वृत्तिर्न, वृत्तस्य च विशेषणयोगो न"

"साकाङ्क्षमसमर्थवत्" इत्यादिन्यायविरोधात्।

१) तथा हि पदजन्यप्रतीतिविशेष्यत्वम् पदार्थत्वम्, पदजन्यप्रतीतिविशेषणत्वम् पदार्थैकदेशत्वम्।

यथा - घटपदस्य घटत्वम्, घटश्चार्थः। तत्र च "अयं घटः" इति ज्ञाने -

प्रकारः < घटत्वम्

प्रकारता < घटत्वनिष्ठा (तादृशप्रकारतानिरूपकम् च ज्ञानम् )

विशेष्यम् < घटः

विशेष्यता < घटनिष्ठा तादृशविशेष्यतानिरूपकम् च ज्ञानम् )

एवञ्च,

घटत्वनिष्ठप्रकारतानिरूपितघटनिष्ठविशेष्यतानिरूपकम्,

घटनिष्ठविशेष्यतानिरूपितघटत्वनिष्ठप्रकारतानिरूपकम्

घटत्वनिष्ठप्रकारतानिरूपकम्

घटनिष्ठनिष्ठविशेष्यतानिरूपकम् ज्ञानम् ।

तथा च-

पदम् = घट इति पदम्,

तज्जन्यप्रतीतिः = घटत्वप्रकारिका घटविशेष्यिका प्रतीतिः,

तत्र विशेषणम् = घटत्वम्,

विशेषणता = घटत्वनिष्ठा

अतः घटत्वम् < पदार्थैकदेशः

घटः < पदार्थः ।

"नित्यो घटः" इति वाक्यमसाधु । पदार्थे घटे नित्यत्वान्वयाऽसंभवात् ।

पदार्थैकदेशेऽपि अन्वयस्वीकारे तु साधुत्वापत्तिः ।

प्रकृते च - "त्रित्वविशिष्टावयघटितसमुदायः" त्रयपदार्थः, तदेकदेशः,

त्रित्वसङ्ख्या, त्रित्वविशिष्टावयवश्चेति ।

२) यस्य अन्वयस्तद्विशेषणम्, यस्मिन् अन्वयस्तद्विशेष्यम् ।

(विशेषणविशिष्टानां समासादिवृत्तयो न भवन्ति, जातासु च समासादिवृत्तिषु विशेषणान्तरसम्बन्धो न भवति) 'त्रयम्' इत्यत्र यदि त्रित्वसङ्ख्यायाम्, अवयवे वा मुनिपदार्थान्वयोऽभ्युपगम्येत, तर्हि तयप्प्रत्ययरूपा तद्धितवृत्तिरेव न स्यात्, अतः तयपः प्राङ्मुनिपदार्थान्वयोऽसंभवः, तयपि च कृते मुनिरूपविशेषणान्तरान्वयाऽसंभवः ।

३) यत् यत्र साकाङ्क्षम्, तस्य तेनैव सह सामर्थ्यम्, यस्य येन सामर्थ्यम्, तस्यैव तेनैव सह समासादिवृत्तिः । यदि त्रिशब्दात्तयप्, तदा तयपर्थे त्रिपदार्थस्य साकाङ्क्षत्वात्तत्रैवान्वयः, न तु मुनिपदार्थे इति । यदि च मुनिपदार्थस्य त्रित्वसङ्ख्यायां तद्विशिष्टावयवे वाऽन्वयस्तदा त्रिपदार्थस्य मुनिपदार्थसापेक्षत्वादसामर्थ्यात् तद्धितानुपपत्तिः ।

उत्तरम् - मुनिपदार्थस्य पदार्थभूते समुदाये एवान्वयः (स्वघटितत्वसम्बन्धेन) - लक्ष्मीटीका मुनिघटितः, अथ च त्रित्वविशिष्टावयवघटितः समुदायः ।

मुनिपदार्थस्य स्वारब्धत्वसम्बन्धेन समुदायेऽन्वयः- केचिद् वैयाकरणा: ।

मुन्यारब्धत्रित्वविशिष्टावयवघटितसमुदायः ।

मुनिपदार्थस्य अभेदसम्बन्धेन त्रित्वविशिष्टावयवेऽन्वयः- (बालमनोरमाटीका,पृ.२)।

मुन्यभिन्नः यः त्रित्वसङ्ख्याविशिष्टावयवस्तद्घटितः समुदायः ।

मुनिपदार्थस्य षष्ठ्यर्थनिष्ठत्वसम्बन्धेन त्रित्वसङ्ख्यायामन्वयः- लक्ष्मीटीकाकारः ।

न चानयोः पक्षयोः पूर्वोक्तदोषत्रयापातः,

मुनिशब्दमनपेक्ष्यैव पूर्वं त्रयमित्यस्य सिद्धिः। ततो मुनीनां त्रयमिति

समासे मुनिशब्दः समुदायेऽन्वेति, तस्य प्रत्ययार्थतया प्राधान्यात् ।

अतोऽसामर्थ्यात्तद्धितानुपपत्तिरिति दोषः, सविशेषणन्यायविरोधश्च न।

न वा 'पदार्थः पदार्थेन० ' इति न्यायविरोधः, प्रथमतः मुनिपदार्थस्य समुदाये एव सम्बन्धसामान्येन अन्वयात्। ततश्च - "मुनिशब्दत्रिशब्दयोः परस्परवार्तानभिज्ञयोरेव शब्दमर्यादया समुदायेऽन्वये सति पश्चात् सङ्ख्यायाः परिच्छेदकत्वस्वभावतया त्रित्वस्य परिच्छेद्यपर्यालोचनायां संनिहितपदान्तरोपस्थितत्वान्मुनय एव परिच्छेद्यतया संबध्यन्ते - त्रयाणां मुनीनां समुदाय इति। सोऽयं पार्ष्ठिकान्वयोऽरुणाधिकरण-(पू. मी. ३-१-४) न्यायविदां सुगम इति। (बालमनोरमाटीका,पृ,३)।

अरुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणाति (तै.स. ६-१-१-६-७)

अत्र हि कारकाणां क्रियान्वयनियमात् अरुणया इत्यस्य प्रथमतः क्रयणक्रियायामन्वयस्ततश्च अमूर्तस्यारुण्यगुणस्य गवि अन्वयः।

तद्वदत्रापि।

वस्तुतस्तु - 'किञ्चिन्निष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतासम्बन्धेन पदजन्योपस्थितिः कारणम्' इति कार्यकारणभावमूलकोऽयं न्यायः। (घटत्वादौ च विशेष्यतासम्बन्धेन घटपदजन्योपस्थितेरभावेन तत्र पदार्थान्तरान्वयाभावः।)

अत्र च न्याये 'देवदत्तस्य गुरुकुलम्' इत्यादौ देवदत्तस्य पदार्थैकदेशे गुरावन्वयकरणाय नित्यसाकाङ्क्षस्थलातिरिक्तत्वेन सङ्कोचः क्रियते, नित्यसाकाङ्क्षस्थले च नायं न्यायः विरोधञ्जनयतीति। गुरुत्वादिकञ्च नित्यसाकाङ्क्षम्। नित्यसाकाङ्क्षत्वञ्च - स्वनिरूपकाकाङ्क्षाव्याप्य-ज्ञानविषयत्वम् -इति जयाकारः।

स्वम् = गुरुत्वम्। तथा च यत्र यत्र गुरुत्वज्ञानम्, तत्र तत्र गुरुत्वनिरूपकं किम्? इति स्व(गुरुत्व)निरूपकाकाङ्क्षा भवतीति गुरुत्वनिरूपकाकाङ्क्षाव्याप्यज्ञानविषयस्य गुरुत्वस्य नित्यसाकाङ्क्षत्वेन तत्र पदार्थैकदेशे देवदत्तादिपदार्थान्वयः। प्रकृतेऽपि (त्रित्व) सङ्ख्या = स्वपरिच्छेद्ये नित्यसाकाङ्क्षेति यत्र यत्र (त्रित्व) सङ्ख्याज्ञानम् तत्र तत्र सङ्ख्यापरिच्छेद्यस्य जिज्ञासा उदेत्येवेति नित्यसाकाङ्क्षत्वान्न न्यायविरोधः। यत्र यत्र सङ्ख्याज्ञानम्, तत्र तत्र सङ्ख्यानिरूपकाकाङ्क्षा = सङ्ख्यानिष्ठपरिच्छेद- कतानिरूपितपरिच्छेद्यताविषयिणी आकाङ्क्षा इति भावः।

उक्तञ्च हरिणा - सम्बन्धिशब्दः सापेक्षः नित्यं सर्वः समस्यते। अतो न कश्चन दोषः।

न च मुनिपदार्थस्य समुदायेऽन्वयेऽपि सविशेषणादिन्यायविरोध इति वाच्यम्, राजपुरुषः सुन्दरः इतिवत् विशेष्यभूतसमुदायेऽन्वये तद्धितादि वृत्तय: भवन्ति। अत्र प्रमाणञ्च - उपमितं व्याघ्रादिभिः सामान्याप्रयोगे(२/१/५६) इति सूत्रे सामान्याप्रयोगे इति ग्रहणम्। अन्यथा असत्यपि तद्ग्रहणे पुरुष व्याघ्र इव शूर इत्यत्र विशेष्यभूते उपमिते पुरुषे सामान्यभूतस्य शूरपदार्थस्य विशेषणत्वेन सविशेषणानामिति निषेधेन समासाप्राप्त्या सामान्याप्रयोगे इति व्यर्थमेव स्यात्। न च त्रिशब्दस्य, त्रयशब्दस्य च सङ्ख्यारूपगुणवाचकतया "पूरणगुणसुहितार्थसदव्ययसमानाधिकरणेन"(२/२/११) इति षष्ठीसमासनिषेधो वाच्यः, प्राचीनमते समानानुपूर्व्या गुणवाची सन् यो गुणोपसर्जनद्रव्यवाची तस्यैवात्र ग्रहणात्, नव्यमते च गुणमात्रवाचिनो- ग्रहणात्, अत्र च त्रिशब्दस्य आदशतः सङ्ख्या सङ्ख्येये इति दिशा द्रव्यमात्रवाचित्वेन दोषाभावात्। तदशिष्यं संज्ञाप्रमाणत्वात्, सोऽचि लोपे चेत् पादपूरणम् इत्यादिसूत्रप्रयोगात् गुणेन सह षष्ठीसमासनिषेधस्य अनित्यत्वज्ञापनात्।

नमस्कृत्य

नमःशब्दस्य साक्षात्प्रभृतिगणे ऊर्यादिगणे वा पाठात "साक्षात्प्रभृतीनि च"(१/४/७४), "ऊर्यादिच्विडाचश्च"(१/४/६२) इत्यनेन वा कृञो योगे गतिसंज्ञायाम्, "समानकर्तृकयोः पूर्वकाले"(३/४/२१)इति क्त्व "कुगतिप्रादयः"(२/२/१८) इति गतिसमासे, क्त्व ल्यपि, तुकि "नमस्पुरसोर्गत्योः"(८/३/4०) इति विसर्गस्य सत्वे

नमस्कृत्य इति। बहुषु पुस्तकेषु नमश्शब्द ऊर्यादिगणे पठित इति दृश्यते, आधुनिकपाठे तु नोपलभ्यते, अतो मन्ये - प्राचीनपुस्तकेषु पाठः स्यादिति ....।

मुनित्रयम् इत्यत्र "कर्मणि द्वितीया"(२/३/२) प्रकृतधातूपात्तप्रधानीभूतव्यापारप्रयोज्य-फलाश्रयत्वप्रकारकेच्छीयोद्देश्यताश्रयत्वम् कर्मत्वम्।

यथा - हरिं भजतीत्यत्र, प्रकृतधातुः = भज्धातुः तदुपात्तप्रधानीभूतव्यापारः = प्रीत्यनुकूलो व्यापारःतत्प्रयोज्यं फलम् = प्रीतिः, ........फलाश्रयत्वप्रकारिका इच्छा = प्रीत्याश्रयो हरिः भवतु। तदीयोद्देश्यम् = हरिः उद्देश्यता = हरिनिष्ठा उद्देश्यताश्रयः = हरिः।

प्रकृते च, प्रकृतधातुः = नमःपूर्वः कृधातुः तत्र प्रधानीभूतव्यापारः = स्वावधिकोत्कृष्टत्वप्रकारकबोधानुकूलो व्यापारः। तत्प्रयोज्यफलम् = .... बोधः। तदाश्रयत्वप्रकारकेच्छोद्देश्यत्वेन मुनित्रयस्य कर्मत्वाद् द्वितीया इति।

यत्तु नमःपूर्वककृधातोः करशिरःसंयोगानुकूलो व्यापार अर्थ इति, तत्तुच्छम्, तथा सति करशिरःसंयोगरूपफलाश्रयत्वाभावान्मुनि-त्रयस्य कर्मत्वानापत्तेः। न चात्र नमस्कृत्य इति कृद्योगात्, हरिं भजतीत्यादौ द्वितीयायाः, "कर्मणि द्वितीया" (२-३-२) कृष्णस्य कृतिरित्यादौ षष्ठ्याश्च "कर्तृकर्मणोः कृति" (२-३-६५) चारितार्थ्येन परत्वात् कर्तृकर्मणोः कृति (कृदन्ततदादिघटितवाक्यप्रयोगे सति कृत्प्रकृत्युपस्थाप्या या क्रिया तादृशक्रियानिरूपितानुक्तकर्तृत्वकर्मत्वैतदन्यतरार्थवाचकं- यत् प्रातिपदिकम्, तस्मात् षष्ठी विभक्तिः भवतु) इति षष्ठी स्यादिति वाच्यम्, "न लोकाव्ययनिष्ठाखलर्थतृनाम्"(२/३६९) इति नमस्कृत्य इत्यव्यययोगे षष्ठीनिषेधात्।

न च पुनरपि परत्वात् नमःयोगे "नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च" (२-३-१६) इति चतुर्थ्येव स्यादिति वाच्यम्," उपपदविभक्तेः कारकविभक्तिर्बलीयसी" (परिभाषेन्दुशेखरः,पृ.३०७) इति

परिभाषया कारकविभक्तेः बलवत्त्वाद् द्वितीयाया एवौचित्यात्।

अयमर्थः - नमःस्वस्ति० इत्यस्य नमःस्वस्त्याद्यन्यतमशब्दघटिते वाक्ये चतुर्थी भवतीत्यर्थस्वीकारे हरये नमः काश्याम् इत्यत्र काशीपदादपि चतुर्थ्यापत्तिरिति नमःस्वस्त्याद्यन्यतमपदप्रयोज्या या विषयता, तन्निरूपिता या विषयता, तादृशविषयताप्रयोजकं यत् प्रातिपदिकम्, तस्माच्चतुर्थीत्यर्थस्वीकारे सत्यप्यत्र दोषस्य तादवस्थ्यम्, अतः न्यायेन समाधानम्।

तत्र च क्रियानिमित्तिका विभक्तिः = क्रियाकारकभावसम्बन्धप्रतिपादिका विभक्तिः कारकविभक्तिः।

पदनिमित्तिका विभक्तिः = क्रियाकारकभावसम्बन्धेतर- (उद्देश्यविधेयभावादि) सम्बन्धप्रतिपादिका विभक्तिरुपपदविभक्तिः।

प्रकृते च द्वितीया कारकविभक्तिः, चतुर्थी तूपपदविभक्तिरिति। तथा च द्वितीया बलवतीति भावः। उपपदविभक्तेः० इति परिभषायां बीजन्तु सर्वसम्बन्धानां क्रियामूलकत्वात् क्रियया सह सम्बन्धोऽन्तरङ्गोऽन्येन तु बहिरङ्ग इति "असिद्धं बहिरङ्गमन्तरङ्गे" (परिभाषेन्दुशेखरः,पृ.१६८) इति परिभाषा, क्रियायाः प्राधान्येन प्रधानकार्यं सर्वतो बलवत् इति युक्तिर्वा।

न च नमःपदार्थेऽन्वयविवक्षायां चतुर्थी, कृधात्वर्थफलेऽन्वयविवक्षायां द्वितीया इति भिन्नविषयत्वात् कथं बाध्यबाधकभाव इति वाच्यम्, नमःशब्दस्य निपातत्वेन द्योतकतया द्योतकवाचकसमभिव्याहारे विषयतायाः विनिगमनाभावेन उभयप्रयोज्यत्वमिति सिद्धान्तात् कृधातुप्रयोज्यविषयतायां नमःपदप्रयोज्यविषयत्वाव्याघातेन नम:पदप्रयोज्यविषयतानिरूपितविषयताप्रयोजकत्वेन तात्पर्यविषयीभूताच्चतुर्थीत्यर्थस्वीकारेण भिन्नविषयत्वाभावात्।

यत्तु - नमः शब्दो द्विधा - स्वरादिः, साक्षात्प्रभृत्यादिश्च, स्वस्त्यादयश्च स्वरादयः, तथा च स्वस्त्यादिसाहचर्यात् स्वरादिगणपठितस्य वाचकस्य नमश्शब्दस्य योगे चतुर्थी, न तु साक्षात्प्रभृत्यादिगणस्थद्योतकनमश्शब्दसमभिव्याहारे

इति, तत्र तु द्वितीयैवेति। तन्न, विनिगमनाविरहेणाक्षरसमाम्नायिकान्तत्वेन, अजन्तत्वेन वा साहचर्यग्रहणे देवेभ्यो नमोऽत्र इत्यादावेव चतुर्थी स्यान्न तु देवेभ्यो नमः इत्यत्र इति केचित्। वस्तुतः नेदमुचितम्, विवक्षितधर्मेणैव साहचर्याश्रयणस्य न्याय्यत्वादन्यथा परिभाषायाः निर्विषयतापत्तेः। अतः "नमोवरिवश्चित्रङः क्यच्" (३/१/१९) इति सूत्रस्थभाष्यप्रामाण्येनानित्यायाः साहचर्यपरिभाषाया अत्राप्रवृत्तेः, तत्र हि नमस्यति देवानित्यत्र चतुर्थीमाशङ्क्योपपदविभक्तेरिति न्यायेन समाहितम्, साहचर्येण द्योतकनमश्शब्दयोगे चतुर्थ्यप्रवृत्तौ क्यचः पूजार्थकत्वेन नमसो द्योतकत्वेन चतुर्थ्यप्राप्तौ भाष्यासङ्गतेः। किञ्च, साहचर्याश्रयणे रावणाय नमस्कुर्यादित्यत्र चतुर्थ्यनापत्तिः, न चात्र स्वरादिनमश्शब्दस्तस्यागतित्वेन सत्वानापत्तेः।

न च पुनरपि उपपदविभक्तिन्यायेन रावणाय नमस्कुर्यात्, स्वयम्भुवे नमस्कृत्य इत्यादावपि द्वितीया स्यादिति वाच्यम्, तत्र अनुकूलयितुमित्यध्याहारेण, कर्मत्वाविवक्षया वा चतुर्थेः सत्वात्।

नमस्कृत्येति पदस्य समस्तत्वेन जहत्स्वार्थायां वृत्तौ नमश्शब्दस्यानर्थक्यादर्थवद्ग्रहणपरिभाषया न चतुर्थीति तत्त्वबोधिनीकृन्मतं तु न सम्यक्, 'देवान् नमस्करोती'-त्यादावुक्तयुक्तेरसम्भवात्, "जहत्स्वार्था तु तत्रैव रूढिर्यत्र विरोधिनी" इत्युक्तेर्योगार्थविरोधित्वे एव जहत्स्वार्थाश्रयणात्। तस्मादुपपदन्यायेनैवात्र चतुर्थी वारणीयेति दिक्।

अत्र च त्रिमुनिघटितसमुदायस्य नमस्कारकर्मत्वेऽपि समुदायस्य प्रत्येकानतिरिक्तत्वेन पाणिन्यादेः नमस्कारकर्मत्वम्। एवञ्चाहत्य नमस्कृत्य इत्यत्र क्त्वाप्रत्ययार्थः उत्तरकालिकत्वम्, तस्य च प्रधानीभूते व्यापारे अन्वयः, तथा च मुनित्रयनिष्ठकर्मतानिरूपकस्वावधिकोत्कृष्टत्वप्रकारकबोधानुकूलव्यापारोत्तर- कालिक इत्यर्थः।

तदुक्तीः परिभाव्य च

तच्छब्दस्य बुद्धिस्थपरामर्शित्वेन प्रत्यासक्तिन्यायेन च मुनित्रयस्य ग्रहणात्, 'तस्य = मुनित्रयस्य उक्तयः' इत्यत्र "कर्तृकर्मणोः कृतिरिति" (२/३/६५) कर्तरि षष्ठ्यां 'प्रतिपदविधाना षष्ठी न समस्यते' इति षष्ठीसमासनिषेधे प्राप्ते 'कृद्योगा च षष्ठी समस्यत इति वक्तव्यम्' इति षष्ठीसमासे तदुक्तयः इति, तद्द्वितीयाबहुवचने तदुक्तीरिति।

न चात्र भावे क्तिन्प्रत्ययस्य सत्त्वात् कर्तुः कर्मणश्चानुक्ततया "उभयप्राप्तौ कर्मणि" (२/३/६६) इति नियमात् कर्तरि षष्ठ्यप्राप्तिः, उक्तिनिरूपितकर्तृत्वस्य मुनित्रये सत्त्वादिति वाच्यम्, उभयप्राप्तिसूत्रे प्राप्तिग्रहणेन प्रयुज्यमानादेव प्राप्तेः संभवात् यत्र कर्तुः कर्मणश्च प्रयोगस्तत्रैव उभयप्राप्ताविति सूत्रं प्रवर्तते, नान्यत्र। प्रकृते च तदित्यनेन कर्तुरेव बोधात् कर्मणोऽप्रयोगादप्रयुज्यमानात् कर्मणि षष्ठ्यप्राप्तेः, कर्तुः शेषत्वविवक्षया वा तदित्यत्र कर्मणि षष्ठ्यप्राप्तेः, अत एव च कर्मणि च इति समासनिषेधोऽपि न, यत्रोभयप्राप्तौ कर्मणि षष्ठी तत्रैव तत्प्रवृत्तेः।

न च पुनः तत्पदबोध्यमुनित्रयसमुदायस्य उक्तौ कर्तृत्वबाधः, अवयवगतकर्तृत्वस्य समुदाये आरोपात्। एतेन मुनित्रयसमुदायनमस्कारे प्रत्येकमुनिनमस्कारो न जात इत्याशङ्कमानाः परास्ताः, समुदायनमस्कारस्य अवयवे पर्यवसानात्, समुदायस्य प्रत्येकानतिरिक्तत्वाद्वा।

परिभाव्य इति कृदन्तयोगेऽपि "न लोकाव्ययनिष्ठाखलर्थतृनाम्" (२/३६९) इति षष्ठीनिषेधाद् द्वितीया। परिभाव्य इत्यस्य विचार्य इत्यर्थः। तथा च मुनित्रयनमनकर्तृकं यद्वचनं तत्कर्मकविचारानुकूलव्यापारोत्तरकालिक इत्यर्थः।

तदुक्तीरित्यत्र घटकीभूततत्छब्दः सर्वनाम। सर्वनाम्नाञ्च विषये शास्त्रेषु सिद्धान्तत्रयं प्रसिद्धम्।

सर्वनाम्नां बुद्धिस्थपरामर्शित्वम्

सर्वनाम्नां प्रधानपरामर्शित्वम्

सर्वनाम्नां पूर्वपरामर्शित्वम्।

तथा चात्र तत्शब्देन बुद्धिस्थत्वात् पूर्वोपस्थिततत्वात् प्रधान्याद्वा मुनित्रयस्य ग्रहणम्। बुद्धिस्थत्वेन वा प्राचां माधवाचार्यादीनाङ्ग्रहणम्।

तच्छब्दस्य बुद्धिविषयतावच्छेदकत्वोपलक्षिततत्तद्धर्मावच्छिन्ने शक्तिरिति केचित्। यथा घटपदार्थं बुद्धावाकलय्य तद्बोधनाय घटपदे उच्चरिते बुद्धिविषयः = घटः, बुद्धिविषयता = घटे, तदवच्छेदकत्वेनोपलक्षितो धर्मः = बुद्धिविषयत्वम्, तद्विशिष्टश्च घट इति। वस्तुततस्तु नेदमुचितमित्यन्ये। यत्र सर्वनाम्ना पूर्वपरामर्श-स्तत्रापि तस्य पदार्थस्य बुद्धिस्थत्वाव्याघाताद्भेदेन व्यवहाराऽसङ्गतेः।

परिभाव्य

परिपूर्वकाद् चौरादिकाद् भूधातोः क्त्वि ल्यपि च परिभाव्येति। परिभाव्य इत्यस्यार्थः विचार्य इति तिरस्कृत्य इति वा। तच्छब्देन मुनित्रयग्रहणे विचार्य इत्यर्थः, प्राचाञ्च ग्रहणे तिरस्कृत्येत्यर्थः। एवञ्च मुनित्रयोक्तिविचारपूर्वकत्वादस्य ग्रन्थस्य समूलत्वं प्रामाण्यञ्च सूचितम्, प्राचीनोक्तितिरस्कारपूर्वकत्वाच्चास्य ग्रन्थस्य प्राचीनग्रन्थैरगतार्थत्वं ध्वनितम्। यद्यपि सकृदुच्चरितः शब्दः सकृदेवार्थङ्गमयति इति न्यायादनेकार्थत्वमनुचितन्तथाप्यावृत्त्याऽर्थद्वयं ज्ञातव्यम्।

न च परिपूर्वकस्य भवतेस्तिरस्कारार्थकतया विचार्य इत्यर्थोऽसङ्गतः, भूधातोः स्वार्थिकण्यन्तस्यैतद्रूपत्वात्तस्य च चिन्तनार्थकत्वादिति तत्त्वबोधिनीबालमनोरमाकारौ। चुरादौ हि "भुवोऽवकल्कने"(सिद्धान्तकौमुदी,पृ.२५४) इति गणसूत्रं पठितम्। अवकल्कनार्थकाद्भवतेर्णिजित्यर्थः, अवकल्कनं मिश्रणमित्येके, चिन्तनमित्यन्ये। अतश्चिन्तनार्थकाद्भवतेरेतद्रूपमिति भावः। यद्यपि भू प्राप्तौ इत्यपि चुरादौ, तस्य तु नेयं वार्ता।

वस्तुतस्तु प्राप्यर्थकस्यापि भवतेरेतद्रूपं भवितुमर्हति, प्राप्तिः ज्ञानम्, तच्चात्र विचारपूर्वकमित्यर्थसङ्गतेरिति तु विद्वांसो विजानीयुः।

"मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्" इति (पातञ्जलयोगसूत्रे १/३३,पृ.१६२) 'मनसा परिभाव्य किञ्चित्' इति नैषधे च विचारार्थकत्वदर्शनेन ण्यन्तभूधातोर्विचारार्थकत्वे बाधकाभाव इति। -लक्ष्मीटीकाकारः

वस्तुतस्तु परिपूर्वकभौवादिकभवतेरप्येतद्रूपं संभवति, तथा हि- "परौ भुवोऽवज्ञाने" (३/३/५५) इति घञ्प्रत्ययविधायकसूत्रे अवज्ञाने इति विशेषणदानेन, धातुपाठे 'कुर्द खुर्द गुर्द गुद क्रीडायामेव' इत्यत्र एवग्रहणेन "सेधतेर्गतौ" (८/३/११३) इत्यत्र गतिग्रहणेन च धातूनामनेकार्थत्व- ज्ञापनादन्यथा तत्तदर्थातिरिक्तार्थासंभवेना-

न्यार्थव्यावृत्तये उपात्तानां तत्तच्छब्दानां वैयर्थ्यमापद्येत इति। अतोऽत्र भौवादिकभवतेः ण्यन्तस्य विचारार्थकस्येदं रूपमिति। न च

अनादरः परिभवः परीभावस्तिरस्क्रिया।

रीढावमाननावज्ञावहेलनमसूर्क्षणम्॥(अमरकोषः,नाट्यवर्गः,पंक्ति४०६/४०८,पृ.४८)

इति कोशविरोधः, कोशस्याण्यन्तभूधातुविषयत्वात् परिपूर्वकादण्यन्तात् तिरस्कारार्थकात् घञा परिभावशब्दव्युत्पादनादिति। - बालमनोरमाकारः।

न च परिभवतेरेव तिरस्कारार्थकत्वेन हेतुमण्णिचि तिरस्कार्य इत्यर्थः स्यादिति वाच्यम्, चौरादिकणिचि प्रेरणाद्यार्थानवगतेः, हेतुमण्णावपि भवतेर्विचारविषयीभवनार्थकत्वेन हेत्वर्थे विचार्येत्यर्थसङ्गतेः। वस्तुतस्तु नेदमुचितमुक्तकोशबलाच्छुद्धभवतेरेव तथार्थावगमात्, अतः हेतुमण्णिच्पक्षे निवृत्तप्रेषणाद्धातोः हेतुमण्णिजिति समाधेयम्, घञन्तपरिभावशब्दात् तत्करोति तदाचष्टे इति णिचि तिरस्कारं कृत्वेत्यर्थस्य फलितार्थप्रदर्शनपरमिदमिति वा वक्तव्यम्। तथा चाहत्य मुनित्रयोक्तीर्विचार्य, प्राचीनोक्तीस्तिरस्कृत्य इत्यर्थः।

विशिष्टार्थस्तुत्रित्वसङ्ख्याविशिष्टावयवघटितसमुदायघटकमुनित्रयकर्तृकवचन-, कर्मकविचारोत्तरकालिकः,माधवाचार्यादिकर्तृकवचनकर्मकतिरस्करणोत्तरकालिक इत्यर्थः।

इयम्

भाविनोऽपि बुद्ध्या विषयीकरणादिदमा निर्देशः। एतेन

इदमस्तु सन्निकृष्टं समीपतरवर्ति चैतदो रूपम्।

अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात्॥

इत्यभियुक्तोक्तेः सिद्धार्थस्यैव सन्निकर्षसंभवेन कौमुद्याश्चासिद्धत्वेन सन्निकृष्टार्थबोधकेदमा निर्देशोऽनुपपन्न इत्यपास्तम्। ग्रन्थकर्त्रा बुद्धिविषयीकृतत्वात्। सांख्यनये तिरोहितरूपेण पूर्वतः सत्त्वात्। बौद्धपदार्थस्वीकारेण वाऽदोषात्। वस्तुतः बुद्धिसत्ता- विशिष्टस्यैव शक्तिग्रहशाब्दबोधविषयत्वं न बाह्यस्य, ज्ञानादीनामन्तःकरणनिष्ठत्वेन तन्निष्ठविषयस्यैव तत्कारणत्वौचित्यात्, प्रत्यक्षादिना बुद्धावकृतस्य बाह्यस्य शक्तिग्रहविषयत्वासंभवाच्चेति भावः।- ज्योत्स्ना

न च भाविनो ग्रन्थस्य बुद्धिस्थत्वात् पुंस्त्वापत्तिः, कौमुदीगतलिङ्गारोपेण तथोक्तेः, तेन चोपमायाः लिङ्गभेदजदुष्टत्वनिरासः।

वैयाकरणसिद्धान्तकौमुदी

व्याकरणम् = शब्दानुशासनम् शास्त्रम्।

विविक्ताः साधवः शब्दाः प्रकृत्यादिविभागतः।

ज्ञाप्यन्ते येन तच्छास्त्रमत्र शब्दानुशासनम्॥

व्याकरणमधीयन्ते विदन्ति वेति वैयाकरणाः, “तदधीते तद्वेद”(४/२/५९) इति द्वितीयान्ताद्व्याकरणशब्दादध्ययनकर्तरि ज्ञानकर्तरि वा अण्। वैयाकरणानां सिद्धान्ताः = वैयाकरणसिद्धान्ताः। वादिप्रतिवादिभ्यां निर्णीता अर्थाः सिद्धान्ताः। सिद्धाः = प्रमाणैः निश्चिताश्च ते अन्ताः = अर्थाः = सिद्धान्ताः। सिद्धः = निष्पन्नः, अन्तः = निश्चयो येषामर्थानान्तादृशा अर्थाः सिद्धान्ताः। अन्ते सिद्धाः = सिद्धान्ताः। तेषां कौमुदी = वैयाकरणसिद्धान्तकौमुदी।

कौ = पृथिव्यां मोदन्ते जना अनेन = कुमुदः”इगुपधज्ञाप्रीकर कः”(३/१/१३५) इत्यनेन कप्रत्यये ,क्विपि कुमद् इति वा। तदर्थश्च चन्द्रः, तस्येयं = कौमुदी = ज्योत्स्ना। कौमुदीपदं स्वसदृशे ग्रन्थे लाक्षणिकम्। सादृश्यप्रयोजकाः धर्माश्च -

प्रकाशकत्वम् आह्लादकत्वम् तापशमकत्वम् तापजनकत्वम्

ज्योत्स्नाग्रन्थयोरुपमानोपमेयभावे विभिन्नलिङ्गत्वेन वैषम्यप्रतीतिरूपदोषवारणार्थ- मुपमानगतस्य स्त्रीत्वस्य उपमेये ग्रन्थे आरोपेण कौमुदीति स्त्रीलिङ्गप्रयोगः, गङ्गायां घोष इतिवत्। सादृश्यमूलकज्योत्स्नात्वारोपेण ग्रन्थस्य ज्योत्स्नात्वेन वाच्यतया ज्योत्स्नावच्छिन्ने नित्यस्त्रीत्वतया ग्रन्थेऽपि स्त्रीत्वप्रयोगः। इयं सूत्रविवृत्तिरिति सूत्रविवृत्तेरेव उपमेयत्वेन वा स्त्रीत्वप्रयोगः।- लक्ष्मी

विरच्यते

विपूर्वकाद् रच्धातोः कर्मणि लट्। “वर्तमानसामीप्ये वर्तमानवद्वा”(३/३/१३१) इति वर्तमानसमीपे भविष्यति वर्तमानवद्भावाल्लट्। मङ्गलस्य ग्रन्थघटकत्वपक्षे तु मङ्गलाचरणद्वारा ग्रन्थारम्भस्य सत्त्वात् प्रारब्धापरिसमाप्तक्रियोपलक्षितकालस्यैव वर्तमानत्वाल्लडुपपन्न एव।

यद्यपि रच्धात्वर्थः = प्रतियत्नः, प्रतियत्नश्च सिद्धे वस्तुनि गुणाधानम्, तथाप्यत्र धातूनामनेकार्थत्वात् रच्धात्वर्थः = शब्दविन्यासादिरूपनिर्माणानुकूलो व्यापार इत्यवधेयम्। विरच्यते इत्यत्र कर्त्राकाङ्क्षायामन्तिममङ्गलश्लोकेन मया = भट्टोजिदीक्षितेन इति कर्तुः लाभः कर्तव्यः। तथा च मया = भट्टोजिदीक्षितेन इत्यत्र तृतीयार्थः कर्ता, तत्र च प्रकृत्यर्थस्य भट्टोजिदीक्षितस्याभेदेनान्वयः। अस्मदर्थभट्टोजिदीक्षिताभिन्नकर्ता इति, कर्तुश्च स्ववृत्तित्व-सम्बन्धेन विपूर्वकरच्धात्वर्थव्यापारे अन्वयः। भट्टोजिदीक्षिताभिन्न- कर्तृवृत्तिः ग्रन्थरचनानुकूलः शब्दविन्यासादिरूपव्यापारः इत्यर्थः। विरच्यते इत्यत्र लडर्थः वर्तमानकालः स च व्यापारे एवान्वेति, तथैव लडर्थः कर्म, तच्चाभेदेन वैयाकरणसिद्धान्तकौमुदीत्यत्र अन्वेति, वैयाकरणसिद्धान्तकौमुदीत्यत्र च उक्ते कर्मणि प्रथमा। एवञ्च वैयाकरणसिद्धान्तकौमुद्यभिन्नकर्मको वर्तमानकालिको शब्दविन्यासादिरूपो व्यापार इति बोधः प्राचीननये।

प्राच्यमते समग्रबोधप्रकारस्तु - मुनित्रयनिष्ठकर्मतानिरूपकस्वावधिकोत्कृष्टत्व-प्रकारकबोधानुकूलव्यापारोत्तरकालिकः, मुनित्रयकर्तृकवचनकर्मकविचारोत्तरकालिकः, प्राचीनाचार्यकर्तृकवचनकर्मकतिरस्कारोत्तरकालिकः वैयाकरणसिद्धान्त- कौमुद्यभिन्नकर्मकः भट्टोजिदीक्षिताभिन्नकर्तृवृत्तिः वर्तमानकालावच्छिन्नो ग्रन्थरचनानुकूलः शब्दविन्यासादिरूपो व्यापार इति। नव्यनये च कर्मणि प्रयोगे फलमुख्यविशेष्यको बोधः। तथा च - मुनित्रयकर्मकनमस्कारोत्तरकालिकः वैयाकरणसिद्धान्तकौमुद्यभिन्नकर्मकः भट्टोजिदीक्षिताभिन्नकर्तृवृत्तिः वर्तमानकालिको यः ग्रन्थरचनाकूलशब्दविन्यासादिरूपो यो व्यापारः, तज्जन्यफलाश्रयीभूता या वैयाकरणसिद्धान्तकौमुदी तदभिन्नकर्मनिष्ठं रचनम् इति बोधः।

## अनुबन्धचतुष्टयनिरूपणम्

सिद्धार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते।

ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥(कुमारिलभट्टश्लोकवार्त्तिकः,कारिका-१७,पृ .६)

विषयश्चाधिकारी च सम्बन्धश्च प्रयोजनम्।

विनाऽनुबन्धं ग्रन्थादौ मङ्गलं नैव शस्यते ॥

इत्युक्तेः ग्रन्थादौ अध्येतृप्रवृत्त्यर्थमनुबन्धचतुष्टयं वक्तव्यम्। तथा हि - 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति न्यायेन च ग्रन्थरचनाप्रवृत्तौ कीर्तिः प्रयोजनं मन्तव्यम्। सा च लोकानां ग्रन्थाध्ययनप्रवृत्त्यधीना। प्रवृत्तिमात्रं प्रति च बलवदनिष्टाननुबन्धीष्टसाधनत्वप्रकारकज्ञानस्य कृतिसाध्यत्वप्रकारकज्ञानस्य च कारणत्वम्, निरुक्तज्ञानद्वयञ्चानुबन्धज्ञानाधीनम्।

ग्रन्थाध्ययनप्रवृत्तिप्रयोजकयथार्थज्ञानविषयत्वमनुबन्धत्वम्। तत्र विषयज्ञानादिष्ट- साधनत्वप्रकारकं कृतिसाध्यत्वप्रकारकञ्च ज्ञानञ्जायते। विशिष्टबुद्धौ विशेष्यतावच्छेदकधर्मप्रकारकज्ञानस्य हेतुत्वात्। अधिकारिज्ञानेन च कृतिसाध्यत्वप्रकारकं ज्ञानञ्जायते, प्रयोजनज्ञानेन चेष्टसाधनत्वप्रकारकं ज्ञानं भवति, सम्बन्धज्ञानेन चोभयञ्ज्ञानञ्जायत इत्यनुबन्धचतुष्टयं निरूपणीयम्। तच्चात्र 'वैयाकरणसिद्धान्तकौमुदीयम्' इत्यनेन निर्दिष्टम्। अत्र विषयः = वैयाकरणसिद्धान्तः, तज्जिज्ञासुरधिकारी, तज्ज्ञानं प्रयोजनम्, साध्यसाधनत्वप्रतिपाद्यप्रतिपादकत्वज्ञातृज्ञेयत्वादिकं यथायथं सम्बन्धः। विषयत्वञ्च न प्रवृत्त्युद्देश्यम्, तस्य प्रयोजनत्वात्, उद्देश्यसाधनस्यैव विषयत्वात्।

## निष्कर्षः

वैयाकरणसिद्धान्तकौमुद्यां पाणिनिव्याकरणस्य सर्वाणि सूत्राणि सन्ति। तेषां सूत्राणां वृत्तिः फक्किकाश्च सन्ति गूढार्थकथने अनेकाः कारिकाश्च सन्ति। तेषु कारिकासु प्रकृतमङ्गलाचरणरूपकारिका सर्वप्रथमास्ति। तस्माद् छात्राणामाभीमुखीकरणे अस्याः कारिकायाः व्याख्यानं कर्तव्यं समुचितम्। तस्मादत्र विमर्शनक्रमे व्याख्यानविधिना दण्डान्वयखण्डन्वयश्च दत्तः। शङ्काः स्थापिता: समाधानानि च दत्तानि। व्याकरणशास्त्रेभ्योरुद्धरणानि स्थापितानि। व्याकरणशास्त्रस्य टीकाभिराशयः प्रकटितः। अनेन विमर्शेन शिक्षकाणां पाठनक्रमे छात्राणां पठनक्रमे सारल्यं जायते। बोधश्च भवति। विमर्शेनानेन पाठकः प्रवीणो दक्षश्च जायते प्रारम्भिको यत्नः फलवान् भवतीति।

## सन्दर्भग्रन्थसूची

अमरसिंह; (२०१७) अमरकोष: (व्याख्या. कुलचन्द्र गौतम), वाराणसी: यशोदा पुस्तकालय ।

ईशादि दश उपनिषद्; (२०७३) (व्याख्या. स्वामी रामानन्द गिरि), देवघाटधाम, तनहुँ: महेशसंस्कृतगुरुकुलम्।

कुमारिलभट्ट; (सन् १९७८) श्लोकवार्तिक: (सम्पा. द्वारकादास शास्त्री), वाराणसी: तारा पब्लिकेशन, प्रथम संस्करण।

गदाधर; (२०४१) व्युत्पत्तिवाद: (व्याख्या. सुदर्शनाचार्य), वाराणसी: वाणी-विलास-प्रकाशन।

विश्वनाथपञ्चाननभट्टाचार्य; (२०५९) कारिकावली (दिनकरीरामरुद्रीसनाथिता) (सम्पा. जेरे, आत्माराम नारायण ), वाराणसी: चौखम्बा कृष्णदास अकादमी।

पतञ्जलि; (सन् १९८८) पातञ्जलं महाभाष्यम् (सम्पा. बालशास्त्री), वाराणसी: वाणी-विलास-प्रकाशन।

पाणिनि; (२०७८) पाणिनीयशिक्षा; (सम्पा. प्रकाश तिवारी), काठमाडौं: विद्यार्थी पुस्तक भण्डार।

पतञ्जलि; (२०६१) पातञ्जलयोग दर्शन (व्याख्या. नरकान्त अधिकारी), काठमाडौं: सूचना तथा सञ्चार मन्त्रालय मुद्रण विभाग।

भट्टोजिदीक्षित; (सन् २०१२) वैयाकरणसिद्धान्तकौमुदी (सम्पा. गिरिधर शर्मा एवं परमेश्वरानन्द शर्मा), वाराणसी: मोतीलाल बनारसीदास।

भट्टोजिदीक्षित; वैयाकरणसिद्धान्तकौमुदी (सम्पा. गोपालदत्त पाण्डेय), वाराणसी: चौखम्बा विद्याभवन, सन् १९९८।

भट्टोजिदीक्षित; (सन् १९६६) वैयाकरणसिद्धान्तकौमुदी (लक्ष्मीव्याख्योपेता), (सम्पा. पञ्जौली, बालकृष्ण); वाराणसी: मोतीलाल बनारसीदास, नेपालीखपरा।

भट्टनागेश; (२०६६) लघुशब्देन्दुशेखर: (नागेशोक्तिप्रकाशिकोपेत) शर्मा, (व्याख्या. खुद्दीझा), वाराणसी: चौखम्बा संस्कृत संस्थान, द्वितीय संस्करण।

भट्टनागेश; (सन् २०१२) परिभाषेन्दुशेखर: (नागोजीभट्टविरचित, तात्याशास्त्रिरचितभूतितिलक एवं मोकाटेगणपतिशास्त्रिप्रणीततत्त्वप्रकाशिकासहित), (सम्पा. शर्मा, गोविन्द ); वाराणसी: चौखम्भा प्रकाशन।

भट्टनागेश; (२०६५) परिभाषेन्दुशेखर: (श्रीवेणीमाधवशास्त्रिप्रणीतबृहच्छास्त्रार्थकलासहित) (सम्पा. शास्त्री, आचार्य रामनारायण), वाराणसी: चौखम्भा प्रकाशन।

भट्टनागेश; (सन् २००९) परिभाषेन्दुशेखर: (नागेशभट्टकृत, जयदेवमिश्ररचितविजयाख्यासहित) (सम्पा. मिश्र, उमेश), वाराणसी: चौखम्बा विद्याभवन।

भट्टनागेश; (सन् २०१६) परिभाषेन्दुशेखर: (सुबोधिनी हिन्दी व्याख्यासहित) (व्याख्या. मिश्र, विश्वनाथ;) वाराणसी: चौखम्बा सुरभारती प्रकाशन,।

भर्तृहरि; (२०४५) वाक्यपदीयम्; (सम्पादकः- पं. रघुनाथ शर्मा), वाराणसी: सम्पूर्णानन्द संस्कृत विश्वविद्यालय।

वरदराजाचार्य; (२०६१) मध्यसिद्धान्तकौमुदी (व्याख्याकार. कालिकान्त झा), वाराणसी: चौखम्बा कृष्णदास अकादमी.।

व्यास; (२०२५) भविष्योत्तरखण्डपुराण - आषाढशुक्लैकादशीमहात्म्य: (व्याख्या. तुलसीराम आचार्य), वाराणसी: कचौडी गली।

व्यास; (२०७७) श्रीमद्भागवतमहापुराणम्, गोरखपुर: गीताप्रेस।

व्यास; (२०८०) श्रीमद्भगवद्गीता, गोरखपुर: गीताप्रेस।